वीवधः, पुं, पर्य्याहारः । परित आह्रियतेऽसौ धान्यतण्डुलादिः । ( यथा, माघे । २ । ६४ ।
"निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥")
मार्गः । पन्थाः । इत्यमरभरतौ ॥ भारः । इति शब्दरत्नावली ॥

वीवधिकः त्रि, ( वीवधेन हरतीति । वीवध + "विभाषा विवधवीवधात् ।" ४ । ४ । १७ । इति ठन् । ) भारवाहकः । इति सिद्धान्तकौमुदी ॥

वीहारः, पुं, ( विहरन्त्यत्रेति । वि + हृ + घञ् । उपसर्गस्य दीर्घः । ) महालयः । स तु बुद्धमन्दिरम् । इति शब्दमाला ॥ विहारः । इत्यमरटीका ॥

वुग, इ त्यागे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् । ) इ, वुङ्गति । इति दुर्गादासः ॥

वुट, इ क क्षित्याम् । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) पञ्चमस्वरी । इ, वुण्टयति । क, वुण्टयति । क्षितिर्हिंसा । इति दुर्गादासः ॥

वु(बु)द्धिः, स्त्री, ( बुध + क्तिन् । ) आत्मनो गुणविशेषः । सा त्रिविधा यथा,—
"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये ।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥
यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता ।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥

वृ, क ञ वृतौ । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) क, वारयति । इति दुर्गादासः ॥

वृ, ङ ग संभक्तौ । इति कविकल्पद्रुमः ॥ ( क्र्या०-आत्म०-सक०-सेट् । ) संभक्तिः सेवनम् । ङ ग, वृणीते । वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः । इति दुर्गादासः ॥

वृ, ञ वृतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-सक०-सेट् । ) ञ, वरति वरते । इति दुर्गादासः ॥

वृ, न ग ञ वृतौ । इति कविकल्पद्रुमः ॥ ( स्वा०-क्र्या०-च-उभ०-सक०-सेट् । ) न ञ, वृणोति वृणुते । ग ञ, वृणाति वृणीते । वकारस्य दन्त्यत्वात् संवृणोति इत्यादौ नानुस्वारस्य मकारः । ओष्ठ्यत्वाच्च वुवूर्षतीत्यादौ ऋदिरञ्चाविवूर् । न च दन्त्यस्य कथमोष्ठ्यकार्य्यमिति वाच्यं यतः स्वभावादोष्ठ्यस्य वकारस्य ओष्ठ्यकार्य्यं स्वाभाविकमेव । क्वचिद्दन्त्यमध्ये पाठः नह्येकवर्णस्योभयस्थानं सम्भवति । इति दुर्गादासः ॥

वृंहणः, त्रि, ( वृंहि + ल्युः । ) पुष्टिकारकः । यथा । संधावी वृंहणो गुरुः । इति शब्दचन्द्रिका ॥

वृंहितं, क्ली, ( वृहि + क्तः । ) हस्तिगर्ज्जनम् । तत्पर्य्यायः । करिगर्ज्जितम् २ । इत्यमरः ॥ ( यथा, महाभारते । ६ । १८ । २ ।
"शङ्खदुन्दुभिघोषैश्च वारणानाञ्च वृंहितैः ।
नेमिघोषै रथानाञ्च दीर्य्यतीव वसुन्धरा ॥")

वृक, ङ आदाने । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) ङ, वर्कते । वरीवृक्यते । इति दुर्गादासः ॥

वृकः, पुं, ( वृणोतीति । वृ + "सृवृभृशुषिमुषिभ्यः कक् ।" उणा० ३ । ४१ । इति कक् । ) कुक्कुरप्रमाणहरिणन्नजन्तुविशेषः । चों च इति ख्यातः । हुण्डार इति हिन्दी भाषा । तत्पर्य्यायः । कोकः २ ईहामृगः ३ । इत्यमरः ॥ वत्सादनः ४ विरुक् ५ गोवत्सादी ६ छागभोजी ७ छागखान्ती ८ जनाशनः ९ । इति राजनिर्घण्टः ॥ ( यथा, भागवते । ३ । १० । २१ ।
"श्वा शृगालो वृको व्याघ्रो मार्ज्जारः शशशल्लकौ ॥" )
काकः । इत्युणादिकोषः ॥ (पोतकः । इत्युणादिटीकाधृतविश्वः । ३ । ४१ ॥ ) वकवृक्षः । इति शब्दरत्नावली ॥ शृगालः । इति हारावली ॥ ( यथा, मनुः । ८ । २३५ ।
"अजाविके तु संरुद्धे वृकैः पाले त्वनायति ।
यां प्रसह्य वृको हन्यात् पाले तत् किल्बिषं भवेत् ॥"
"वृकैः शृगालप्रभृतिभिः ।" इति मेधातिथिः ॥)
क्षत्त्रियः । अनेकधूपः । सरलद्रवः । इति भरतधृतरभसः ॥ ( तस्करः । इति निघण्टुः । ३ । २४ ॥ * ॥ वर्कते शत्रुप्राणानादत्ते इति । वृक आदाने + कः । वज्रः । इति निघण्टुः । २ । २० ॥ )

वृकदंशः, पुं, (वृकान् दशतीति । दन्श + अण् ।) कुक्कुरः । इति हेमचन्द्रः ॥

वृकधूपः, पुं, ( वृकोऽनेकधूप एव धूपः । वृकः सरलद्रवस्तत्प्रधानो धूपो वा ।) नानासुगन्धिद्रव्यकृतदशाङ्गादिधूपः । तत्पर्य्यायः । कृत्रिमधूपकः २ । इत्यमरः ॥ वकधूपः ३ । इति तट्टीका ॥ सरलद्रवरसः । टारपिन् इति भाषा । तत्पर्य्यायः । पायसः २ श्रीवासः ३ श्रीवेष्टः ४ सरलद्रवः ५ । इत्यमरः ॥

वृकधूर्त्तः, पुं, ( धूर्त्तो वृकः राजदन्तादिवत् पूर्व्वनिपातः । ) शृगालः । इति हारावली ॥

वृका, स्त्री, अम्बष्ठा । इति रत्नमाला ॥

वृकाक्षी, स्त्री, (वृकस्याक्षीव अक्षि चिह्नं यस्याः ।) त्रिवृत् । इति रत्नमाला ॥

वृकारातिः, पुं, ( वृकस्यारातिः । ) कुक्कुरः । इति शब्दमाला ॥

वृकारिः, पुं, ( वृकस्यारिः । ) कुक्कुरः । इति राजनिर्घण्टः ॥

वृकी, स्त्री, पाठा । इति राजनिर्घण्टः ॥

वृकोदरः, पुं, ( वृकस्येवोदरो यस्य । यद्वा, वृकः वृकनामकोऽग्निरुदरे यस्य ।) भीमसेनः । तत्पर्य्यायः । भीमः २ मरुत्पुत्रः ३ किर्म्मीरनिसूदनः ४ कीचकनिसूदनः ५ वकनिसूदनः ६ हिड़म्बनिसूदनः ७ । इति हेमचन्द्रः ॥ वकवैरी ८ मारुतिः ९ । इति जटाधरः ॥ अस्य व्युत्पत्तिर्यथा,—
"कथासु भीमसेनेन परिपृष्टः प्रतापवान् ।
त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदकृत् ॥
भविता स तदा ब्रह्मन् कर्त्ता चैव वृकोदरः ।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुसूनुर्महाबलः ॥
यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः ।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः ॥"
इति मात्स्ये ६५ अध्यायः ॥

वृक्णं, त्रि, (व्रश्च + क्तः । ) छिन्नम् । इत्यमरः ॥ ( यथा, सांख्यतत्त्वकौमुद्याम् ।
"नहि पाणौ वृक्णे स्तने वा जाते कुमारी स्तनाञ्जाता वेति ॥")

वृच, ङ वृतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) सप्तमस्वरी । ङ, वृचते वरं कन्या । इति दुर्गादासः ॥

वृक्षः, पुं, ( व्रश्च छेदने + "स्नुव्रश्चिकृत्यृषिभ्यः कित् ।"उणा० ३।६६। इति सः । स च कित् । "वृक्ष वरणे । अतोऽच्यावृणोतीति वृक्ष इति सिद्धे प्रपञ्चार्थं व्रश्चिग्रहणम् ।"इति तट्टीकायामुज्ज्वलदत्तः ।) स्थावरयोनिविशेषः । गाछ इति भाषा । तत्पर्य्यायः । महीरुहः २ शाखी ३ विटपी ४ पादपः ५ तरुः ६ अनोकहः ७ कुटः ८ सालः ९ पलाशी १० द्रुः ११ द्रुमः १२ आगमः १३ । इत्यमरः ॥ अगच्छः १४ विष्टरः १५ महीरुट् १६ कुचिः १७ स्थिरः १८ कारस्करः १९ नगः २० अगः २१ कुटारः २२ । इति शब्दरत्नावली ॥ विटपः २३ कुजः २४ वनस्पतिः २५ अद्रिः २६ शिखरी २७ कुठः २८ । इति जटाधरः ॥ कुञ्जः २९ क्षितिरुहः ३० अङ्घ्रिपः ३१ भूरुहः ३२ भूजः ३३ महीजः ३४ धरणीरुहः ३५ क्षितिजः ३६ शालः ३७ । इति राजनिर्घण्टः ॥ तस्य षड़्जातिर्यथा,—
"कुरण्टाद्या अग्रवीजा मूलजास्तूत्पलादयः ।
पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः शल्लकीमुखाः ॥
शाल्यादयो वीजरुहाः संमूर्च्छजास्तृणादयः ।
स्युर्वनस्पतिकायस्य षडेते मूलजातयः ॥"
इति हेमचन्द्रः ॥
"संस्वेदजापि विज्ञेया वृक्षगोपशुजन्तवः ।"
इत्यग्निपुराणम् ॥
भद्रप्रदवृक्षा यथा,—
श्रीभगवानुवाच ।
"आश्रमे नारिकेलश्च दाड़िमश्च धनप्रदः ।
शिविरस्य यदीशाने पूर्व्वे पुत्त्रप्रदस्तरुः ॥
सर्व्वत्र मङ्गलार्हश्च तरुराजो मनोहरः ।
रसालवृक्षः पूर्व्वस्मिन् नृणां सम्पत्प्रदस्तथा ॥
शुभप्रदश्च सर्व्वत्र सुरकारी निशामय ।
विल्वश्च पनसश्चैव जम्बीरो वदरी तथा ।
प्रजाप्रदश्च पूर्व्वस्मिन् दक्षिणे धनदस्तथा ॥